শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীৱণ্শঠকোপ শ্রীশ্রীনিৱাসনিগমান্ত যতীন্দ্র মহাদেশিকৈরনুগৃহীতং

# ॥ শ্রীরামভদ্র মঙ্গলাশাসনম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥শ্রীরামভদ্র মঙ্গলাশাসনম্॥

শরণাগত সন্ত্রাণ নিপুণায মহাত্মনে।
অযোধ্যাজন ভাগ্যায রামভদ্রায মঙ্গলম্॥ **1**॥

কৌসল্যানন্দ কন্দায কল্যাণগুণসিন্ধৱে।
শরণ্যায ৱরেণ্যায রামভদ্রায মঙ্গলম্॥ **2**॥

কৌশিকাখ্য মহাযোগি সন্দেশসফলীকৃতৌ।
কৃতিনে নতিতুষ্টায রামভদ্রায মঙ্গলম্॥ **3**॥

ৱৈদেহী ৱদনাম্ভোজ লোলংবাযিতচেতসে।
ভদ্রাণামপি ভদ্রায রামভদ্রায মঙ্গলম্॥ **4**॥

গৌতমাশ্রম সাফল্য নিদানপদপাংসৱে।
দাশকীশাদিমিত্রায রামভদ্রায মঙ্গলম্॥ **5**॥

মহাপাতক নির্মুক্তিহেতু সেতুৱিধাযিনে।
শিক্ষিতাশরজালায রামভদ্রায মঙ্গলম্॥ **6**॥

ৱিভীষণ পরিত্রাণ সংহৃষ্ট মনসেঽনিশম্।
প্রাপ্তসীতায রামায রামভদ্রায মঙ্গলম্॥ **7**॥

প্রাপ্তরাজ্যায রামায ভরতাভীষ্টদাযিনে।
সর্ৱবন্ধুসমেতায রামভদ্রায মঙ্গলম্॥ **8**॥

শ্রীনিৱাসযতীন্দ্রোক্তং সীতাৱল্লভ মঙ্গলম্।
যে পঠন্তি মহাত্মানঃ তেষাং ভূযাৎ তু মঙ্গলম্॥ 9॥

॥ ইতি শ্রীরামভদ্র মঙ্গলাশাসনং সমাপ্তম্॥